# Shri Chandrashekharendra Sarasvati Panchapanchashatka Stotram

# श्री चन्द्रशेखरेन्द्रसरस्वती-पञ्चपञ्चाशत्क-स्तोत्रम्

## Document Information

Text title : chandrashekharendrasarasvatIpanchapanchAshatkastotram

File name : chandrashekharendrasarasvatIpanchapanchAshatkastotram.itx

Category : deities_misc, gurudev, panchAshata

Location : doc_deities_misc

Author : Kavi Kokila Dr. V. Raghavan

Proofread by : Aruna Narayanan

Translated by : in Tamil Dr. V. Raghavan

Source : From the Archives of Dr. V. Raghavan Centre For Performing Arts (Regd.)

Acknowledge-Permission: Copyright Dr. V. Raghavan Centre For Performing Arts (Regd.)., Chennai-20, Smt. Nandini Ramani, http://www.drvraghavancentre.com/

Latest update : January 15, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2023

*sanskritdocuments.org*

# श्री चन्द्रशेखरेन्द्रसरस्वती-पञ्चपञ्चाशत्क-स्तोत्रम्

श्रीचन्द्रशेखराचार्यशेखराय नमो नमः ।
नमः शङ्करसन्तानसुधाम्बुधिसुधांशवे ॥ १॥

महादेवेन्द्रहस्ताब्जसञ्जाताय नमो नमः ।
काञ्चीश्रीकामकोट्याख्यपीठाधीशाय ते नमः ॥ २॥

महात्रिपुरसुन्दर्याः चन्द्रमौलीश्वरस्य च ।
सन्तताराधनानन्दनिर्भराय नमो नमः ॥ ३॥

नमस्सत्यव्रतक्षेत्रनिवासरसिकाय ते ।
कामाक्ष्येकाम्रनाथेशसाक्षात्कारवते नमः ॥ ४॥

महादेवीहस्तिगिरिनाथसान्निध्ययोगिने ।
नमो, नमः शिवास्थानस्थानैकान्त्यप्रियाय ते ॥ ५॥

नमोऽद्वैतमतव्याख्यासिंहासननृपाय ते ।
षण्मतोपासनाभक्तिमार्गजीवातवे नमः ॥ ६॥

वेदोद्धरणमत्स्याय कूर्मायामृतदायिने ।
लोकोद्धारवराहाय नरसिंहाय ते नमः ॥ ७॥

नमः प्रपन्नप्रह्लादवर्धकाद्भुतमूर्तये ।
यज्ञाचरणतुष्टाय कुमारब्रह्मचारिणे ॥ ८॥

तेजसा क्रान्तलोकाय तीर्थपादाय ते नमः ।
गुणाभिरामरामाय धर्मानुग्रहकारिणे ॥ ९॥

योगत्रयोपदेष्ट्रे ते बुद्धाय करुणादृशे ।
कलिदोषहरायास्तु पुरुषोत्तम ते नमः ॥ १०॥

नमो नारायणस्मृत्या नारायाणमयाय ते ।
श्रीचक्रिणे सुगदिने सुदर्शनविराजिने ।

नन्दकाय नमस्तेऽस्तु शङ्खतीर्थप्रदाय च ॥ ११॥

नमः शिवाय चन्द्रार्धशेखराय नमो नमः ।
भवाय भवनाशाय शम्भवे च मयोभुवे ॥ १२॥

दक्षिणामूर्तये मौनच्छिन्नसंशीतये नमः ।
शङ्कराय नमः कामजिते कालजिते नमः ॥ १३॥

नमो मृडाय ते सर्वमङ्गलालय ते नमः ।
सौम्यीकृतभुजङ्गाय मान्त्रिकायास्तु ते नमः ॥ १४॥

आश्रिताभीष्टवरद सहकारपरायण ।
चिदभ्रलील त्यागेश ज्योतिरूप रसात्मक ॥ १५॥

आश्रितप्राण संसाररोगवैद्येश ते नमः ।
भक्तप्रसादस्य कृते भिक्षाटनकृते नमः ॥ १६॥

भक्तपापविषाशाय वृषारूढाय ते नमः ।
अन्नप्राणमनोरूपत्रिपुरातीत ते नमः ॥ १७॥

सन्न्यासिगणनाथाय स्वामिनाथाय ते नमः ।
श्रीशिवास्थानयाथार्थ्यकृते तत्स्थिरवासिने ॥ १८॥

श्रीचन्द्रशेखरैकात्म्यात् चन्द्रशेखर ते नमः ।
नम इन्द्र परैश्वर्यात् वैखर्या च सरस्वती ।
तत्त्वातत्त्वक्षीरनीरविवेकपरहंस ते ॥ १९॥

अत्रये त्रिगुणातीतब्रह्मनिष्ठाय ते नमः ।
आनन्दब्रह्मविद्याया गुरो ते भृगवे नमः ॥ २०॥

प्रपञ्चमायाकुत्साय कुत्सायास्तु नमस्तव ।
वसिष्ठाय नमस्तेऽस्तु राघवस्य गुरोस्तव ॥ २१॥

शतानन्दप्रसूतेस्ते गौतमाय नमो नमः ।
दक्षिणाशागुरुश्रेष्ठकुम्भजायास्तु ते नमः ॥ २२॥

श्रुतिस्मृत्यध्वगुरवे याज्ञवल्क्याय ते नमः ।
मोक्षाध्वसाधनीभूतवीणावादनवेदिने ॥ २३॥

नमो वाल्मीकये तुभ्यं राघवख्यातिदायिने ।
व्यासाय भारतख्यातमहिम्ने ते नमो नमः ॥ २४॥

ब्राह्म्या स्थित्या भागवतमहिमोत्कीर्तनेन च ।
देव्या च लालितत्वेन शुकस्त्वमसि ते नमः ॥ २५॥

जैमिने वेदसंरक्षिन् ब्रह्मविद् बादरायण ।
गुणागुणज्ञ कपिल योगनिष्ठ पतञ्जले ॥ २६॥

न्यायवादिन्नक्षपाद विशेषाभिज्ञ काश्यप ।
नम आगमशास्त्रज्ञसम्प्रदायानुयायिने ॥ २७॥

गोविन्दभगवत्पादस्मृतितादात्म्यशोभिने ।
विवेकचूडामणये सहस्रमुपदेशिने ॥ २८॥

मनीषिणे समदृशे दक्षिणामूर्तये नमः ।
मण्डनाय ब्रह्मविद्यामण्डनायास्तु ते नमः ॥ २९॥

नैष्कर्म्यसिद्धिसंफुल्लमानसोल्लास ते नमः ।
सच्छिष्यसङ्घशरणपद्मपादाय ते नमः ॥ ३०॥

हस्तामलकवद् ब्रह्मतत्त्वसाक्षात्कृते नमः ।
नमोऽस्तु ते विमुक्तात्मन् व्याख्यावाचस्पते तव ॥ ३१॥

भक्तकल्पतरो तुभ्यं चित्सुखानुभविन् नमः ।
यशः परिमलाकृष्टभक्तभृङ्गालये नमः ॥ ३२॥

विद्यारण्य नमस्तेऽस्तु जीवन्मुक्तिप्रकाशक ।
अद्वैतसिद्धिमूलाय मधुसूदन ते नमः ॥ ३३॥

ततत्प्रसिद्धक्षेत्रेषु निर्मितानि यदाज्ञया ।
सशिष्यशङ्कराचार्यमन्दिराणि नमोऽस्तु ते ॥ ३४॥

षष्ठ्यब्दपूर्तिकलवैवेदनिध्यादिसंग्रहैः ।
परिक्षामानदानाद्यैर्नियमाध्यायपोषिणे ॥ ३५॥

लुप्तशाखासमुद्धर्त्रे वेदमेलनकारिणे ।
वेदाध्ययनशालानां स्थापकायास्तु ते नमः ॥ ३६॥

वेदधर्मपरिपालसभासंस्थापकाय ते ।
धर्मज्ञविरुद्द्वारा स्मार्तसंरक्षकाय ते ॥ ३७॥

येन संस्कृतबोधार्थं स्थापिताऽमरभारती ।

परीक्षाः पाठशालाश्च तस्मै दीर्घदृशे नमः ॥ ३८॥

जीर्णोद्धरणकुम्भाभिषेकप्रोत्साहनैर्मुहुः ।
देवालये जनश्रद्धां वर्धयित्रे नमोऽस्तु ते ॥ ३९॥

गोदामणिवचोमार्गशीर्षगाथार्थमेलनैः ।
शैववैष्णवसौहार्दपोषकायास्तु ते नमः ॥ ४०॥

धर्माचार्यकपीठानां समुदायसमागमैः ।
ऐकमत्येन धर्माणां प्रचारपथदर्शिने ॥ ४१॥

कामकोटीकोशमालाद्वारा नानास्तवावलीः ।
सद्राविडानुवादास्ते प्रकाशितवते नमः ॥ ४२॥

वेदान्तन्यायमीमांसाविद्वद्वाक्यार्थमाननैः ।
नानामतीयवैदुष्यवर्धयित्रेऽस्तु ते नमः ॥ ४३॥

व्यासागमकलातन्त्रज्योतिर्वित्तममेलनैः ।
जीर्यतां संप्रदायानां जीवनौषध ते नमः ॥ ४४॥

दरिद्रकन्यकोद्वाहसाह्यार्थनिधिदायिने ।
श्रीरामजयलेखेषु जनोत्साहपुषे नमः ॥ ४५॥

अन्नकार्श्यनिवृत्त्यर्थं मुष्टिशालिव्यवस्थितिः ।
दृष्टा येन सदोल्लासिप्रतिभाढ्याय ते नमः ॥ ४६॥

वैद्यशालासु रुग्णानामाश्वासारोग्यहेतवे ।
भक्तान् प्रसाददानाय संप्रेरितवते नमः ॥ ४७॥

कारागृहेषु बद्धानामुत्सवादिषु हृष्टये ।
सत्स्मृत्यै भक्ष्यदानादि प्रचोदितवते नमः ॥ ४८॥

तेजोनिधे कलापूर्ण बुध सौम्य गुरो कवे ।
स्थिर सर्वग्रहाकार तेजोमण्डलभासुर ॥ ४९॥

ललितासततोपास्तिकालिदास नमोऽस्तु ते ।
भवभूतिलसद्गात्र भारवे ब्रह्मतेजसा ॥ ५०॥

माघ सर्वाघरहित मुक्तिश्रीहर्षनिर्भर ।
श्रीकामाक्षीनिदिध्यासमौनमूकाय ते नमः ॥ ५१॥

सर्वान् स्वंजनवत् सर्वकुशलं परिपृच्छते ।
सर्वलोकप्रियायास्तु नमो रामनिभाय ते ॥ ५२॥

अहमेव गुरोरस्य मत इत्यभिमन्यते ।
यथा सर्वः श्रितः तादृग्विश्वासाधायिने नमः ॥ ५३॥

एकोऽद्वितीयमहिमा त्रिगुणाद्यतीतः
भक्तप्रदत्तपुरुषार्थचतुष्टयश्च ।
पञ्चाक्ष-षड्रिपु-जयी द्युतिसप्तसप्तिः
भात्यष्टमूर्त्यनवमो दशदिक्प्रसिद्धः ॥ ५४॥

ईश्वरो जङ्गमस्सोऽयमिति यो घुष्यतेऽखिलैः ।
तस्मै जयेन्द्रगुरवे श्रीजगद्गुरवे नमः ॥ ५५॥

इति जगद्गुरुश्रीशङ्कराचार्यश्रीचन्द्रशेखरेन्द्रसरस्वतीश्रीचरणानुगृहीत-
कविकोकिल-सकलकलाकलाप-बिरुदवर्धिष्णुना राघवेन विरचितं
श्रीचन्द्रशेखरेन्द्रसरस्वतीपञ्चपञ्चाशत्कस्तोत्रं सम्पूर्णम् ।

डॉ. राघवः

Copyright Dr. V. Raghavan Centre For Performing Arts (Regd.)
www.drvraghavancentre.com

Encoded and proofread by Aruna Narayanan

*Shri Chandrashekharendra Sarasvati Panchapanchashatka Stotram*
pdf was typeset on March 3, 2023

Please send corrections to *sanskrit@cheerful.com*